## आस्पदं प्रतिष्ठायाम्। (१४६/१०६१)

आत्मयापनाय स्थानं प्रतिष्ठा, तस्यामास्पदम् इति सुट् निपात्यते। आस्पदमनेन लब्धम्[1]। प्रतिष्ठायाम् इति किम्? आ पदात् आपदम्॥

## आश्चर्यमनित्ये। (१४७/१०६२)

अनित्यतया विषयभूतया अद्भुतत्वमिह [2]उपलक्ष्यते, तस्मिन्नाश्चर्यं [3]निपात्यते। 'चरेराङि चागुरौ' (वा. २१५) इति यत्प्रत्यये कृते निपातनात् सुट्। [4]आश्चर्यं यदि स भुञ्जीत। आश्चर्यं यदि सोऽधीयीत। चित्रमद्भुतम् इत्यर्थः। अनित्ये इति किम्? [5]आचर्यं कर्म शोभनम्॥

## वर्चस्केऽवस्करः। (१४८/१०६३)

कुत्सितं वर्चः वर्चस्कम् अन्नमलम्, तस्मिन्न[6]भिधेयेऽवस्करः इति निपात्यते। अवपूर्वस्य किरतेः कर्मणि 'ऋदोरप्' (३. ३. ५७/३२३२) इत्यप्, निपातनात् सुट्। अवकीर्यते इत्यवस्करोऽन्नमलम्, तत्सम्बन्धात् देशोऽपि तथोच्यते। वर्चस्के इति किम्? अवकरः॥

## अपस्करो रथाङ्गम्। (१४९/१०६४)

अपस्करः इति निपात्यते रथाङ्गं चेद्[7] भवति। अपपूर्वात् किरतेः 'ऋदोरप्' (३. ३. ५७/३२३२) इत्यप्, निपातनात् सुट्। अपस्करो रथावयवः। रथाङ्गम् इति किम्? [8]अपकरः॥

## विष्किरः शकुनिर्विकिरो वा। (१५०/१०६५)

विष्किरः इति किरतेः विपूर्वस्य 'इगुपधज्ञाप्रीकिरः कः' (३. १. १३५/२८९७) इति कप्रत्यये विहिते सुट् निपात्यते शकुनिश्चेद् भवति। विकिरशब्दाभिधेयो वा शकुनिर्भवति।

सर्वे शकुनयो भक्ष्या विष्किराः कुक्कुटादृते।

विष्किरो वा [9]शकुनौ इति वा[10]ग्रहणादेव सुड्विकल्पे सिद्धे विकिरग्रहणमिह तस्यापि शकुनेरन्यत्र प्रयोगो मा भूत्[11]॥

## ह्रस्वाच् चन्द्रोत्तरपदे मन्त्रे। (१५१/३६२७)

चन्द्रशब्दे उत्तरपदे ह्रस्वात् [12]परः सुडागमो भवति [13]मन्त्रविषये। सुश्चन्द्रः (तं. सं. ४. ४. ४. ६) [14]युष्मान्। ह्रस्वात् इति किम्? 'सूर्याचन्द्रमसाविव' (ऋ. ५.५१.१५)। मन्त्रे इति किम्? सुचन्द्रा पौर्णमासी। उत्तरपदं समास एव भवति इति प्रसिद्धम्, तत इह न भवति, शुक्रमसि, [15]चन्द्रमसि॥

---

1. प्रतिष्ठा अनेन लब्धा इत्यर्थः इत्यधिकम् ब. ड. ग. फ. 2. वक्ष्यते ह. 3. इति इत्यधिकम् क. ह. 4. वाक्यमिदं नास्ति फ. 5. आचर्यं शोभनम् कर्म क. 6. अभिधेये नास्ति फ. 7. तत् इत्यधिकम् फ. 8. अवकरः ह. 9. शकुनिः ब. क. ड. फ. 10. ग्रहणादेव नास्ति फ. 11. इति इत्यधिकम् ग. फ. 12. परः नास्ति ब. ह. 13. मन्त्रे फ. 14. देवान् फ, युष्माकं देवता इत्यधिकम् ह. 15. हरिश्चन्द्रो विद्युति ब. फ.